# shrInArAyaNaguruvirachitAH saMskRitakriyAH

# સ્તોત્રાણિ નારાયણગુરુવિરચિતાનિ

## Document Information

Text title : stotrasa.ngraha nArAyaNagururachitaM

File name : stotranArAyaNaguru.itx

Category : major_works, bIjAdyAkSharamantrAtmaka

Location : doc_z_misc_major_works

Transliterated by : Encoded by Shankara and P.S.Ramachandran

Proofread by : PSA Easwaran

Latest update : March 30, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

shrInArAyaNaguruvirachitAH saMskRitakriyAH

# સ્તોત્રાણિ નારાયણગુરુવિરચિતાનિ


સ્તોત્રક્રિયાઃ

વિનાયકસ્તોત્રમ્

૧. વિનાયકાષ્ટકમ્

વિષ્ણુસ્તોત્રાણિ

૨. શ્રીવાસુદેવાષ્ટકમ્

૩. વિષ્ણ્વષ્ટકમ્

દેવીસ્તોત્રમ્

૪. ભદ્રકાલ્યષ્ટકમ્

સુબ્રહ્મણ્ય સ્તોત્રાણિ

૫. ષાણ્માતુરસ્તવમ્

૬. ગુહાષ્ટકમ્

૭. બાહુલેયાષ્ટકમ્

શિવસ્તોત્રમ્

૮. ચિદંબરાષ્ટકમ્

સંકીર્ણાનિ

૯. જાતિનિર્ણયમ્

૧૦. ધર્મઃ

૧૧. આશ્રમમ્

૧૨. મુનિચર્યાપઞ્ચકમ્

દાર્શનિકક્રિયાઃ

૧૩. દર્શનમાલા

૧૪. બ્રહ્મવિદ્યા પઞ્ચકમ્

૧૫. નિર્વૃતિપઞ્ચકમ્

૧૬. શ્લોકત્રયી

૧૭. હોમમન્ત્રમ્
૧૮. વેદાન્તસૂત્રમ્
૧૯. સમાધિ શ્લોકૌ

વિનાયકસ્તોત્રમ્

૧. વિનાયકાષ્ટકમ્

નમદ્દેવવૃન્દં લસદ્વેદકન્દં
શિરઃશ્રીમદિન્દું શ્રિતશ્રીમુકુન્દમ્ ।
બૃહચ્ચારુતુન્દં સ્તુતશ્રીસનન્દં
જટાહીન્દ્રકુન્દં ભજેઽભીષ્ટસન્દમ્ ॥ ૧॥

કિલદ્દેવગોત્રં કનદ્ધેમગાત્રં
સદાનન્દમાત્રં મહાભક્તમિત્રમ્ ।
શરચ્ચન્દ્રવક્ત્રં ત્રયીપૂતપાત્રં।
સમસ્તાર્ત્તિદાત્રં ભજે શક્તિપુત્રમ્ ॥ ૨॥

ગલદ્દાનમાલં ચલદ્ભોગિમાલં
ગલામ્ભોદકાલં સદા દાનશીલમ્ ।
સુરારાતિકાલં મહેશાત્મબાલં
લસત્પુણ્ડ્રફાલં ભજે લોકમૂલમ્ ॥ ૩॥

ઉરસ્તારહારં શરચ્ચન્દ્રહીરં
સુરશ્રીવિચારં હૃતાર્ત્તારિભારમ્ ।
કટે દાનપૂરં જટાભોગિપૂરં
કલાબિન્દુતારં ભજે શૈવવીરમ્ ॥ ૪॥

કરારૂઢમોક્ષં વિપદ્ભઙ્ગદક્ષં
ચલત્સારસાક્ષં પરાશક્તિપક્ષમ્ ।
શ્રિતામર્ત્યવૃક્ષં સુરારિદ્રુતક્ષં
પરાનન્દપક્ષં ભજે શ્રીશિવાક્ષમ્ ॥ ૫॥

સદાશં સુરેશં સદા પાતુમીશં
નિદાનોદ્ભવં શાઙ્કરપ્રેમકોશમ્ ।
ધૃતશ્રીનિશેશં લસદ્દન્તકોશં
ચલચ્છૂલપાશં ભજે કૃત્તપાશમ્ ॥ ૬॥

તતાનેકસન્તં સદા દાનવન્તં
બુધશ્રીકરન્તં ગજાસ્યં વિભાન્તમ્ ।
કરાત્મીયદન્તં ત્રિલોકૈકવૃન્તં
સુમન્દં પરન્તં ભજેઽહં ભવન્તમ્ ॥ ૭॥

શિવપ્રેમપિણ્ડં પરં સ્વર્ણવર્ણં
લસદ્દન્તખણ્ડં સદાનન્દપૂર્ણમ્ ।
વિવર્ણપ્રભાસ્યં ધૃતસ્વર્ણભાણ્ડં
ચલચ્ચારુશુણ્ડં ભજે દન્તિતુણ્ડમ્ ॥ ૮॥

---

વિષ્ણુસ્તોત્રાણિ

## ૨. શ્રીવાસુદેવાષ્ટકમ્

શ્રીવાસુદેવ, સરસીરુહપાઞ્ચજન્ય-
કૌમોદકીભયનિવારણચક્રપાણે ।
શ્રીવત્સવત્સ, સકલામયમૂલનાશિન્,
શ્રીભૂપતે, હર હરે, સકલામયં, મે ॥ ૧॥

ગોવિન્દ, ગોપસુત, ગોગણપાલલોલ,
ગોપીજનાઙ્ગકમનીયનિજાઙ્ગસઙ્ગ ।
ગોદેવિવલ્લભ, મહેશ્વરમુખ્યવન્દ્ય,
શ્રીભૂપતે, હર હરે, સકલામયં, મે ॥ ૨॥

નીલાલિકેશપરિભૂષિતબર્હિબર્હ,
કાલાંબુદદ્યુતિકલાયકલેવરાભ ।
વીર, સ્વભક્તજનવત્સલ, નીરજાક્ષ,
શ્રીભૂપતે, હર હરે, સકલામયં મે ॥ ૩॥

આનન્દરૂપ, જનકાનકપૂર્વદુન્દુ-
ભ્યાનન્દસાગરસુધાકરસૌકુમાર્ય ।
માનાપમાનસમ માનસરાજહંસ,
શ્રીભૂપતે, હર હરે, સકલામયં મે ॥ ૪॥

મઞ્જીરમઞ્જુમણિશિઞ્જિતપાદપદ્મ,

કઞ્જાયતાક્ષ, કરુણાકર, કઞ્જનાભ ।
સઞ્જીવનૌષધસુધામય, સાધુરમ્ય,
શ્રીભૂપતે, હર હરે, સકલામયં મે ॥ ૫॥

કંસાસુરદ્વિરદકેસરિવીર, ઘોર-
વૈરાકરામયવિરોધકરાજ, શૌરે ।
હંસાદિરમ્યસરસીરુહપાદમૂલ,
શ્રીભૂપતે, હર હરે, સકલામયં મે ॥ ૬॥

સંસારસઙ્કટવિશઙ્કટકઙ્કટાય
સર્વાર્થદાય સદયાય સનાતનાય ।
સચ્ચિન્મયાય ભવતે સતતં નમોઽસ્તુ
શ્રીભૂપતે, હર હરે, સકલામયં મે ॥ ૭॥

ભક્તપ્રિયાય ભવશોકવિનાશનાય
મુક્તિપ્રદાય મુનિવૃન્દનિષેવિતાય ।
નક્તન્દિવં ભગવતે નતિરસ્મદીયા
શ્રીભૂપતે, હર હરે, સકલામયં મે ॥ ૮॥

---

૩. વિષ્ણ્વષ્ટકં

વિષ્ણું વિશાલારુણપદ્મનેત્રં
વિભાન્તમીશાંબુજયોનિપૂજિતમ્ ।
સનાતનં સન્મતિશોધિતં પરં
પુમાંસમાદ્યં સતતં પ્રપદ્યે ॥ ૧॥

કલ્યાણદં કામફલપ્રદાયકં
કારુણ્યરૂપં કલિકલ્મષઘ્નમ્ ।
કલાનિધિં કામતનૂજમાદ્યં
નમામિ લક્ષ્મીશમહં મહાન્તમ્ ॥ ૨॥

પીતાંબરં ભૃઙ્ગનિભં પિતામહ-
પ્રમુખ્યવન્દ્યં જગદાદિદેવમ્ ।
કિરીટકેયૂરમુખૈઃ પ્રશોભિતં
શ્રીકેશવં સન્તતમાનતોઽસ્મિ ॥ ૩॥

ભુજઙ્ગતલ્પં ભુવનૈકનાથં
પુનઃ પુનઃ સ્વીકૃતકાયમાદ્યમ્ ।
પુરન્દરાદ્યૈરપિ વન્દિતં સદા
મુકુન્દમત્યન્તમનોહરં ભજે ॥ ૪॥

ક્ષીરાંબુરાશેરભિતઃ સ્ફુરન્તં
શયાનમાદ્યન્તવિહીનમવ્યયમ્ ।
સત્સેવિતં સારસનાભમુચ્ચૈઃ
વિઘોષિતં કેશિનિષૂદનં ભજે ॥ ૫॥

ભક્તાર્ત્તિહન્તારમહર્નિશન્તં
મુનીન્દ્રપુષ્પાઞ્જલિપાદપઙ્કજમ્ ।
ભવઘ્નમાધારમહાશ્રયં પરં
પરાપરં પઙ્કજલોચનં ભજે ॥ ૬॥

નારાયણં દાનવકાનનાનલં
નતપ્રિયં નામવિહીનમવ્યયમ્ ।
હર્તું ભુવો ભારમનન્તવિગ્રહં
સ્વસ્વીકૃતક્ષ્માવરમીડિતોઽસ્મિ ॥ ૭॥

નમોઽસ્તુ તે નાથ! વરપ્રદાયિન્
નમોઽસ્તુ તે કેશવ! કિઙ્કરોઽસ્મિ ।
નમોઽસ્તુ તે નારદપૂજિતાઙ્ઘ્રે
નમો નમસ્ત્વચ્ચરણં પ્રપદ્યે ॥ ૮॥

ફલશ્રુતિઃ
વિષ્ણ્વષ્ટકમિદં પુણ્યં યઃ પઠેદ્ભક્તિતો નરઃ ।
સર્વપાપવિનિર્મુક્તો, વિષ્ણુલોકં સ ગચ્છતિ ॥

---

દેવીસ્તોત્રમ્

૪. ભદ્રકાળ્યષ્ટકમ્

શ્રીમચ્છઙ્કરપાણિપલ્લવકિરલ્લોલંબમાલોલ્લસ-
ન્માલાલોલકલાપકાલકબરીભારાવલીભાસુરીમ્ ।
કારુણ્યામૃતવારિરાશિલહરીપીયૂષવર્ષાવલીં

બાલાંબાં લલિતાલકામનુદિનં શ્રીભદ્રકાલીં ભજે ॥ ૧॥

હેલાદારિતદારિકાસુરશિરઃશ્રીવીરપાણોન્મદ-
શ્રેણીશોણિતશોણિમાધરપુટીં વીટીરસાસ્વાદિનીમ્ ।
પાટીરાદિસુગન્ધિચૂચુકતટીં શાટીકુટીરસ્તનીં
ઘોટીવૃન્દસમાનધાટિયુધીં શ્રીભદ્રકાલીં ભજે ॥ ૨॥

બાલાર્કાયુતકોટિભાસુરકિરીટામુક્તમુગ્ધાલક-
શ્રેણીનિન્દિતવાસિકામરુસરોજાકાઞ્ચલોરુશ્રિયમ્ ।
વીણાવાદનકૌશલાશયશયશ્યાનન્દસન્દાયિની-
મમ્બામમ્બુજલોચનામનુદિનં શ્રીભદ્રકાલીં ભજે ॥ ૩॥

માતઙ્ગશ્રુતિભૂષિણીં મધુધરીવાણીસુધામોષિણીં
ભ્રૂવિક્ષેપકટાક્ષવીક્ષણવિસર્ગક્ષેમસંહારિણીમ્ ।
માતઙ્ગીં મહિષાસુરપ્રમથિનીં માધુર્યધુર્યાકર-
શ્રીકારોત્તરપાણિપઙ્કજપુટીં શ્રીભદ્રકાલીં ભજે ॥ ૪॥

માતઙ્ગાનનબાહુલેયજનનીં માતઙ્ગસંગામિનીં
ચેતોહારિતનુચ્છવીં શફરિકાચક્ષુષ્મતીમમ્બિકામ્ ।
જૃંભત્પ્રૌઢિનિશુંભશુંભમથિનીમંભોજભૂપૂજિતાં
સમ્પત્સન્તતિદાયિનીં હૃદિ સદા શ્રીભદ્રકાલીં ભજે ॥ ૫॥

આનન્દૈકતરઙ્ગિણીમમલહૃન્નાલીકહંસીમણીં
પીનોત્તુઙ્ગઘનસ્તનાં ઘનલસત્પાટીરપઙ્કોજ્જ્વલામ્ ।
ક્ષૌમાવીતનિતંબબિંબરશનાસ્યૂતક્વણત્ કિઙ્કિણીં
એણાઙ્કાંબુજભાસુરાસ્યનયનાં શ્રીભદ્રકાલીં ભજે ॥ ૬॥

કાલાંભોદકલાયકોમલતનુચ્છાયાશિતીભૂતિમત્-
સંખ્યાનાન્તરિતસ્તનાન્તરલસન્માલાકિલન્મૌક્તિકામ્ ।
નાભીકૂપસરોજનાલવિલસચ્છાતોદરીશાપદીં
દૂરીકુર્વયિ દેવિ, ઘોરદુરિતં શ્રીભદ્રકાલીં ભજે ॥ ૭॥

આત્મીયસ્તનકુંભકુઙ્કુમરજઃપઙ્કારુણાલંકૃત-
શ્રીકણ્ઠૌરસભૂરિભૂતિમમરીકોટીરહીરાયિતામ્ ।
વીણાપાણિસનન્દનન્દિતપદામેણીવિશાલેક્ષણાં
વેણીહ્રીણિતકાલમેઘપટલીં શ્રીભદ્રકાલીં ભજે ॥ ૮॥

ફલશ્રુતિઃ
દેવીપાદપયોજપૂજનમિતિ શ્રીભદ્રકાલ્યષ્ટકં
રોગૌઘાઘઘનાનિલાયિતમિદં પ્રાતઃ પ્રગેયં પઠન્ ।
શ્રેયઃ શ્રીશિવકીર્તિસમ્પદમલં સમ્પ્રાપ્ય સમ્પન્મયીં
શ્રીદેવીમનપાયિનીં ગતિમયન્ સોઽયં સુખી વર્તતે ॥

---

સુબ્રહ્મણ્ય સ્તોત્રાણિ

## ૫. ષાણ્માતુરસ્તવમ્

ગૌરીસહાયસુહૃદૂરીકૃતાવયવભૂરીષુ વૈરિષુ તમ-
સ્સૂરીકૃતાયુધનિવારીતદોષ નિજનારીકલાલસમનઃ ।
ક્રૂરીભવત્તિમિરચારી હિતાપદુરરી નીતિસૂરિ કરુણા-
વારીણવારિધર, ગૌરીકિશોર, મમ દૂરીકુરુષ્વ દુરિતમ્ ॥ ૧॥

મલ્લીકૃતત્રિદશમલ્લીસદા સુદતિવલ્લીકુચાઙ્કુણલસત્
સલ્લીનકુઙ્કુમરસોલ્લીનવત્સ, યુધિ ભલ્લીસ્મયોઽસિ દિતિજૈઃ ।
ફુલ્લીકુરુષ્વ સ ચ વલ્લીતગોધિતલવલ્લીવિલોલબુધહૃદ્-
વલ્લીનિવાસ, મમ સોલ્લીનકેકિ હયસલ્લીલપાહૃદુદજમ્ ॥ ૨॥

પ્રાણીકૃતસ્વનખરાણીતભક્તજનવાણીશમુખ્યસુમન-
શ્શ્રેણીસુજાનુતલતૂણીતમાલતિમિરાણીલચૂચુકભરા ।
વાણીવિલાસમલિવેણીવિપઞ્ચિમૃદુવાણી તવાંગરમણી
શ્રોણીઘના સુમતિ, શાણીતનોતુ ભૃશમેણીવિશાલનયના ॥ ૩॥

રાગાભિષિક્તનિજકેશાદિપાદવપુરાશાપિશાચદહના
શ્રીશાતકુંભનિભપાશાઙ્કુશાભરણનાશાન્તકાનુચર! ભોઃ ।
ભીશાઙ્કૂલાહરણગોશાબકાવનતકોશાધિપાશુ ભગવન્
પાશાટવી ભવ હૃતાશાશયાવપિશિતાશા હિ ભોગભુગમુમ્ ॥ ૪॥

સન્તાપસન્તતિનિશાન્તાવસન્તમયિ કાન્તાયુગાન્તરરતે,
કિન્તાવકે હૃદિ નિતાન્તાકુલાશયમહન્તાનપેતમવિતુમ્ ।
કિન્તામસં ભવસિ, ચિન્તામણીરુચિરસન્તાનપાદપદવ-
શ્ચિન્તાધુતાન્તરુજમન્તાદિહીન કુરુ માન્તાવકીનભજનમ્ ॥ ૫॥

સીમાવિહીનગુણ સોમાવચૂડ જિતકામાભિમાન સુમતે!

ભૂમાધવાદિનુત ભૂમાસમાન, પુરકામાન્ધકાન્તકગુરો ।
નામાલિજાપિજનકામાવસાનફલદામાશમાતનુ વિભો,
હેમારુણાહિતનિકામાતિભીમ, ગુહ સામાદિ વેદવિદયમ્ ॥ ૬॥

વેદાનુગીતનુતપાદારવિન્દયુગમાદાય સેવનવિધે-
રાદાવમું સરસમાદાતુકામ શુભકેદારકેલિનિલયે ।
તાદાત્મ્યલીનમતિસાદાપનોદ, સકલાદાનદૈવતતરો
ભૂદાસકલ્પલતિકોદારદામ કુરુ મોદાંબુરાશિવસતિમ્ ॥ ૭॥

કિઞ્ચાસુરદ્વિરદપઞ્ચાનનપ્રણવસઞ્ચારિહંસસમને
કિઞ્ચાપલન્નમન, તુઞ્ચાનુજીવિ મમ સિઞ્ચામૃતાભ કૃપયા ।
પઞ્ચાનનપ્રણય કઞ્ચાપિ શાસિકતિ મુઞ્ચાશુ બદ્ધકમતિં
પઞ્ચાશુગારિસુરપઞ્ચાનનાત્મજમિમઞ્ચાપિ પાહિ સતતમ્ ॥ ૮॥

કાલાય શીતરુચિબાલાવચૂડ, શુભશીલાવધૂતદુરિત
શ્રીલાઘમીવરદ લીલાહિવારિસખ બાલાશયાશયશુચે ।
કાલાનલોપમિત ફાલાવલોકનક
blank. Missing line
વેલયુધો મહતિ કોલાહલારવસુલીલા તનોતુ કુશલમ્ ॥ ૯॥

---

૬. ગુહાષ્ટકમ્

શાન્તં શંભુતનૂજં સત્યમનાધારં જગદાધારં
જ્ઞાતૃજ્ઞાનનિરન્તરલોકગુણાતીતં ગુરુણાતીતમ્ ।
વલ્લીવત્સલભૃઙ્ગારણ્યકતારુણ્યં વરકારુણ્યં
સેનાસારમુદારં પ્રણમત દેવેશં ગુહમાવેશમ્ ॥ ૧॥

વિષ્ણુબ્રહ્મસમર્ચ્યં ભક્તજનાદિત્યં વરુણાતિથ્યં
ભાવાભાવજગત્ત્રયરૂપમથારૂપં જિતસારૂપમ્ ।
નાનાભુવનસમાધેયં વિનુતાધેયં વરરાધેયં
કેયુરાઙ્ગનિષઙ્ગં પ્રણમત દેવેશં ગુહમાવેશમ્ ॥ ૨॥

સ્કન્દં કુઙ્કુમવર્ણં સ્પન્દમુદાનન્દં પરમાનન્દં
જ્યોતિઃસ્તોમનિરન્તરરમ્યમહસ્સામ્યં મનસાયામ્યમ્ ।
માયાશૃઙ્ખલબન્ધવિહીનમનાદીનં પરમાદીનં
શોકાપેતમુદાત્તં પ્રણમત દેવેશં ગુહમાવેશમ્ ॥ ૩॥

વ્યાલવ્યાવૃતભૂષં ભસ્મસમાલેપં ભુવનાલેપં
જ્યોતિશ્ચક્રસમર્પિતકાયમનાકાયવ્યયમાકાયમ્ ।
ભક્તત્રાણનશક્ત્યા યુક્તમનુદ્યુક્તં પ્રણયાસક્તં
સુબ્રહ્મણ્યમરણ્યં પ્રણમત દેવેશં ગુહમાવેશમ્ ॥ ૪॥

શ્રીમત્સુન્દરકાયં શિષ્ટજનાસેવ્યં સુજટાસેવ્યં
સેવાતુષ્ટસમર્પિતસૂત્રમહાસત્રં નિજષડ્વક્ત્રમ્ ।
પ્રત્યર્થ્યાનતપાદસરોરુહમાવાહં ભવભીદાહં
નાનાયોનિમયોનિં પ્રણમત દેવેશં ગુહમાવેશમ્ ॥ ૫॥

માન્યં મુનિભિરમાન્યં મઞ્જુજટાસર્પં જિતકન્દર્પં
આકલ્પામૃતતરલતરઙ્ગમનાસઙ્ગં સકલાસઙ્ગમ્ ।
ભાસા હ્યધરિતભાસ્વન્તં ભવિકસ્વાન્તં જિતભીસ્વાન્તં
કામં કામનિકામં પ્રણમત દેવેશં ગુહમાવેશમ્ ॥ ૬॥

શિષ્ટં શિવજનતુષ્ટં બુધહૃદયાકૃષ્ટં હૃતપાપિષ્ઠં
નાદાન્તદ્યુતિમેકમનેકમનાસઙ્ગં સકલાસઙ્ગમ્ ।
દાનવિનિર્જિતનિર્જરદારુમહાભીરું તિમિરાભીરું
કાલાકાલમકાલં પ્રણમત દેવેશં ગુહમાવેશમ્ ॥ ૭॥

નિત્યં નિયમિહૃદિસ્થં સત્યમનાગારં ભુવનાગારં
બન્ધૂકારુણલલિતશરીરમુરોહારં મહિમાહારં
કૌમારીકરપીડિતપાદપયોજાતં દિવિ ભૂજાતં
કણ્ઠેકાલમકાલં પ્રણમત દેવેશં ગુહમાવેશમ્ ॥ ૮॥

## ૭. બાહુલેયાષ્ટકં

ૐ ૐ ૐ હોમધૂમપ્રકટતટજટાકોટિભોગિપ્રપૂરં
આં આં આં આદિતેયપ્રણતપદયુગાંભોરુહશ્રીવિલાસમ્ ।
ઊં ઊં ઊં ઉગ્રનેત્રત્રયલસિતવપુર્જ્યોતિરાનન્દરૂપં
શ્રીં શ્રીં શ્રીં શીઘ્રચિત્તભ્રમહરમનિશં ભાવયે બાહુલેયમ્ ॥ ૧॥

હ્રીં હ્રીં હ્રીં હૃષ્ટષટ્કન્ધરમઘમરણારણ્યસંવર્ત્તવહ્નિં
ઐં ઐં ઐં ઐઙ્ગુદીસત્ફલમૃદુમિલિતપ્રાશિયોગીન્દ્રવન્દ્યમ્ ।
ક્લીં ક્લીં ક્લીં ક્લિષ્ટકાયક્લમદવદહનક્લેશનિર્મૂલનાશં

સૌં સૌં સૌં સૌરકાન્તિભ્રમહરમનિશં ભાવયે બાહુલેયમ્ ॥ ૨॥

શં શં શં શબ્દરૂપં શશિધરમમલં શઙ્કરં સાંબમૂર્તિં
શિં શિં શિં શિષ્ટવન્દ્યં શિખરિનિલયનં શિક્ષિતાનેકલોકમ્ ।
શું શું શું શુભ્રહાસં શુભકરમતિસન્દેહસન્દોહનાશં
શૌં શૌં શૌં શૌક્લિતાઙ્ગં સિતભસિતગણૈર્ભાવયે બાહુલેયમ્ ॥ ૩॥

રં રં રં રમ્યદેહં રજતગિરિગૃહં રક્તપદ્માઙ્ઘ્રિયુગ્મં
રિં રિં રિં રિક્તશોકપ્રકૃતિપરમજંઘાલમાનીલનેત્રમ્ ।
રું રું રું રૂક્ષકાયપ્રતિભટહનનં રક્તકૌશેયવસ્ત્રં
રૌં રૌં રૌં રૌં રૌરવાદિદ્રુતહરકુહરં ભાવયે બાહુલેયમ્ ॥ ૪॥

હં હં હં હંસયોગિપ્રવરસુખકરં હસ્તલક્ષ્મીસમેતં
હિં હિં હિં હીનમાનં હિતસુખવરદં હિંસયાપેતકીલમ્ ।
હું હું હું હુંકૃતિધ્વંસિતરજનિચરક્રૌર્યકૌટિલ્યમૂર્તિં
હૈં હૈં હૈં હૈમકુંભાયતકરસહજં ભાવયે બાહુલેયમ્ ॥ ૫॥

ણં ણં ણં નન્દિકેશપ્રવરભુજગનિર્વિઘ્નકર્મપ્રપઞ્ચં
ણિં ણિં ણિં નીલકણ્ઠપ્રિયસુતમજિતં નિર્મલાઙ્ગં નિરીહમ્ ।
ણું ણું ણું ણુત્તનાભોત્તરનિભૃતનિરાલંબકૈવલ્યમૂર્તિં
ણૌં ણૌં ણૌં નામરૂપાત્મકજગદખિલં ભાવયે બાહુલેયમ્ ॥ ૬॥

ભં ભં ભં ભાગધેયં ભગવદનુચરપ્રાઞ્જલિસ્તોત્રપૂરં
ભિં ભિં ભિં ભીમનાદાન્તકમદનહરં ભીષિતારાતિવર્ગમ્ ।
ભું ભું ભું ભૂતિભૂષાર્ચ્ચિતમમિતસમસ્તાર્થશાસ્ત્રાન્તરઙ્ગં
ભૌં ભૌં ભૌં ભૌમમુખ્યં ગ્રહગણનપટું ભાવયે બાહુલેયમ્ ॥ ૭॥

વં વં વં વાહિનીશં વલરિપુનિલયસ્તોત્રસમ્પત્સમૂહં
વિં વિં વિં વીરબાહુપ્રભૃતિસહચરં વિઘ્નરાજાનુજાતમ્ ।
વું વું વું ભૂતનાથં ભુવનનિલયનં ભૂરિકલ્યાણશીલં
વૌં વૌં વૌં ભાવિતારિપ્રતિભયમનિશં ભાવયે બાહુલેયમ્ ॥ ૮॥

શિવસ્તોત્રમ્

૮. ચિદંબરાષ્ટકમ્

બ્રહ્મમુખામરવન્દિતલિઙ્ગં જન્મજરામરણાન્તકલિઙ્ગમ્ ।

કર્મનિવારણકૌશલલિઙ્ગં તન્મૃદુ પાતુ ચિદંબરલિઙ્ગમ્ ॥ ૧॥

કલ્પકમૂલપ્રતિષ્ઠિતલિઙ્ગં દર્પકનાશયુધિષ્ઠિરલિઙ્ગમ્ ।
કુપ્રકૃતિપ્રકરાન્તકલિઙ્ગં તન્મૃદુ પાતુ ચિદંબરલિઙ્ગમ્ ॥ ૨॥

સ્કન્દગણેશ્વરકલ્પિતલિઙ્ગં કિન્નરચારણગાયકલિઙ્ગમ્ ।
પન્નગભૂષણપાવનલિઙ્ગં તન્મૃદુ પાતુ ચિદંબરલિઙ્ગમ્ ॥ ૩॥

સાંબસદાશિવશઙ્કરલિઙ્ગં કામ્યવરપ્રદકોમલલિઙ્ગમ્ ।
સામ્યવિહીનસુમાનસલિઙ્ગં તન્મૃદુ પાતુ ચિદંબરલિઙ્ગમ્ ॥ ૪॥

કલિમલકાનનપાવકલિઙ્ગં સલિલતરંગવિભૂષણલિઙ્ગમ્ ।
પલિતપતંગપ્રદીપકલિઙ્ગં તન્મૃદુ પાતુ ચિદંબરલિઙ્ગમ્ ॥ ૫॥

અષ્ટતનુપ્રતિભાસુરલિઙ્ગં વિષ્ટપનાથવિકસ્વરલિઙ્ગમ્ ।
શિષ્ટજનાવનશીલિતલિઙ્ગં તન્મૃદુ પાતુ ચિદંબરલિઙ્ગમ્ ॥ ૬॥

અન્તકમર્દનબન્ધુરલિઙ્ગં કૃન્તિતકામકલેવરલિઙ્ગમ્ ।
જન્તુહૃદિસ્થિતજીવકલિઙ્ગં તન્મૃદુ પાતુ ચિદંબરલિઙ્ગમ્ ॥ ૭॥

પુષ્ટધિયસ્સુ ચિદંબરલિઙ્ગં દૃષ્ટમિદં મનસાનુપઠન્તિ ।
અષ્ટકમેતદવાઙ્મનસીયં અષ્ટતનું પ્રતિ યાન્તિ નરાસ્તે ॥ ૮॥

---

સંકીર્ણાનિ

## ૯. જાતિનિર્ણયમ્

મનુષ્યાણં મનુષ્યત્વં જાતિર્ગોત્રં ગવાં યથા ।
ન બ્રાહ્મણાદિરસ્યૈવં હા તત્ત્વં વેત્તિ કોઽપિ ન ॥

---

## ૧૦. ધર્મઃ

ધર્મ એવ પરં દૈવં ધર્મ એવ મહાધનમ્ ।
ધર્મસ્સર્વત્ર વિજયી ભવતુ શ્રેયસે નૃણામ્ ॥

---

## ૧૧. આશ્રમમ્

આશ્રમેઽસ્મિન્ ગુરુઃ કશ્ચિદ્વિદ્વાન્ મુનિરુદારધીઃ ।
સમદૃષ્ટિઃ શાન્તગંભીરાશયો વિજિતેન્દ્રિયઃ ॥ ૧॥

પરોપકારી સ્યાદ્દીનદયાલુઃ સત્યવાક્પટુઃ ।
સદાચારરતઃ શીઘ્રકર્તવ્યકૃદતન્દ્રિતઃ ॥ ૨॥

અધિષ્ઠાયાસ્ય નેતૃત્વં કુર્યાત્ કશ્ચિત્ સભાં શુભામ્ ।
અસ્યામાયાન્તિ યે તે સ્યુઃ સર્વે સોદરબુદ્ધયઃ ॥ ૩॥

યદ્વદત્રૈવ તદ્વચ્ચ સ્ત્રીણાં પુંસાં પૃથક્ પૃથક્ ।
વિદ્યાલયા દિશિ દિશિ ક્રિયન્તામાશ્રમાઃ સભાઃ ॥ ૪॥

એકૈકસ્યામાસુ નેતા ચૈકૈકઃ સ્યાદ્વિચક્ષણઃ
સર્વાભિરનુબન્ધોઽદ્વૈતાશ્રમસ્યાભિરન્વહમ્ ॥ ૫॥

---

૧૨. મુનિચર્યાપઞ્ચકમ્

ઇત્યાદિ વાદોપરતં મહાન્તં પ્રશાન્તગંભીરનિજસ્વભાવમ્ ।
શોણાચલે શ્રીરમણં સમીક્ષ્ય પ્રોવાચ નારાયણસંયમીન્દ્રઃ ॥

ભુજઃ કિમુપધાનતાં કિમુ ન કુંભિની મઞ્ચતાં
વ્રજેત્ વૃજિનહારિણી સ્વપદપાતિની મેદિની ।
મુનેરપરસમ્પદા કિમિહ મુક્તરાગસ્ય ત-
ત્ત્વમસ્યધિગમાદયં સકલભોગ્યમત્યશ્નુતે ॥ ૧॥

મુનિઃ પ્રવદતાં વરઃ ક્વચન વાગ્યમી પણ્ડિતો
વિમૂઢ ઇવ પર્યટન્ ક્વચન સંસ્થિતોઽપ્યુત્થિતઃ ।
શરીરમધિગમ્ય ચઞ્ચલમનેહસા ખણ્ડિતં
ભજત્યનિશમાત્મનઃ પદમખણ્ડબોધં પરમ્ ॥ ૨॥

અયાચિતમલિપ્સયા નિયતિદત્તમન્નં મુનિ-
સ્તનોઃ સ્થિતય ઇત્યદન્ પથિ શયાનકોઽવ્યાકુલઃ ।
સદાત્મદૃગનશ્વરં સ્વપરમાત્મનોરૈક્યતઃ
સ્ફુરન્ નિરુપમં પદં નિજમુપૈતિ સચ્ચિત્ સુખમ્ ॥ ૩॥

અસત્સદિતિ વાદતો બહિરચિન્ત્યમગ્રાહ્યમ-
ણ્વખર્વમમલં પરં સ્તિમિતનિમ્નમત્યુન્નતમ્ ।
પરાઙ્મુખ ઇતસ્તતઃ પરિસમેતિ તુર્યં પદં
મુનિસ્સદસતોરદ્વયાદુપરિગન્તુમભ્યુદ્યતઃ ॥ ૪॥

સ્વવેશ્મનિ વને તથા પુલિનભૂમિષુ પ્રાન્તરે
ક્વ વા વસતુ યોગિનો વસતિ માનસં બ્રહ્મણિ ।
ઇદં મરુમરીચિકાસદૃશમાત્મ,દૃષ્ટ્યાખિલં
નિરીક્ષ્ય રમતે મુનિર્નિરુપમે પરબ્રહ્મણિ ॥ ૫॥

---

દાર્શનિકક્રિયાઃ

૧૩. દર્શનમાલા

૧. અધ્યારોપદર્શનમ્
આસીદગ્રેઽસદેવેદં ભુવનં સ્વપ્નવત્પુનઃ ।
સસર્જ સર્વં સઙ્કલ્પમાત્રેણ પરમેશ્વરઃ ॥ ૧॥

વાસનામયમેવાદાવાસીદિદમથ પ્રભુઃ ।
અસૃજન્માયયા સ્વસ્ય માયાવીવાખિલં જગત્ ॥ ૨॥

પ્રાગુત્પત્તેરિદં સ્વસ્મિન્ વિલીનમથ વૈ સ્વતઃ ।
બીજાદઙ્કુરવત્સ્વસ્ય શક્તિરેવાસૃજત્સ્વયમ્ ॥ ૩॥

શક્તિસ્તુ દ્વિવિધા જ્ઞેયા તૈજસી તામસીતિ ચ ।
સહવાસોઽનયોર્નાસ્તિ તેજસ્તિમિરયોરિવ ॥ ૪॥

મનોમાત્રમિદં ચિત્રમિવાગ્રે સર્વમીદૃશમ્ ।
પ્રાપયામાસ વૈચિત્ર્યં ભગવાંશ્ચિત્રકારવત્ ॥ ૫॥

આસીત્ પ્રકૃતિરેવેદં યથાઽદૌ યોગવૈભવઃ ।
વ્યતનોદથ યોગીવ સિદ્ધિજાલં જગત્પતિઃ ॥ ૬॥

યદાઽઽત્મવિદ્યાસઙ્કોચસ્તદાઽવિદ્યા ભયઙ્કરમ્ ।
નામરૂપાત્મનાઽત્યર્થં વિભાતીહ પિશાચવત્ ॥ ૭॥

ભયઙ્કરમિદં શૂન્યં વેતાલનગરં યથા ।
તથૈવ વિશ્વમખિલં વ્યકરોદદ્ભુતં વિભુઃ ॥ ૮॥

અર્કાદ્યથાક્રમં વિશ્વં તથા નૈવેદમાત્મનઃ ।
સુપ્તેરિવ પ્રાદુરાસીદ્યુગપત્સ્વસ્ય વીક્ષયા ॥ ૯॥

ધાનાદિવ વટો યસ્માત્ પ્રાદુરાસીદિદં જગત્ ।
સ બ્રહ્મા સ શિવો વિષ્ણુઃ સ પરઃ સર્વ એવ સઃ ॥ ૧૦॥

૨. અપવાદદર્શનમ્

ચૈતન્યાદાગતં સ્થૂલસૂક્ષ્માત્મકમિદં જગત્ ।
અસ્તિ ચેત્સદ્ઘનં સર્વં નાસ્તિ ચેદસ્તિ ચિદ્ઘનમ્ ॥ ૧॥

અન્યન્ન કારણાત્કાર્યમસદેતદતોઽખિલમ્ ।
અસતઃ કથમુત્પત્તિરનુત્પન્નસ્ય કો લયઃ ॥ ૨॥

યસ્યોત્પત્તિર્લયો નાસ્તિ તત્પરં બ્રહ્મ નેતરત્ ।
ઉત્પત્તિશ્ચ લયોઽસ્તીતિ ભ્રમત્યાત્મનિ માયયા ॥ ૩॥

કારણાવ્યતિરિક્તત્વાત્ કાર્યસ્ય કથમસ્તિતા ।
ભવત્યતઃ કારણસ્ય કથમસ્તિ ચ નાસ્તિતા ॥ ૪॥

કાર્યત્વાદસતોઽસ્યાસ્તિ કારણં ન હ્યતો જગત્ ।
બ્રહ્મૈવ તર્હિ સદસદિતિ મુહ્યતિ મન્દધીઃ ॥ ૫॥

એકસ્યૈવાસ્તિ સત્તા ચેદન્યસ્યાસૌ ક્વ વિદ્યતે ।
સત્યસ્યાત્માશ્રયો યદ્યપ્યસતિ સ્યાદસંભવઃ ॥ ૬॥

વિભજ્યાવયવં સર્વમેકૈકં તત્ર દૃશ્યતે ।
ચિન્માત્રમખિલં નાન્યદિતિ માયાવિદૂરગમ્ ॥ ૭॥

ચિદેવ નાન્યદાભાતિ ચિતઃ પરમતો ન હિ ।
યચ્ચ નાભાતિ તદસદ્યદસત્તન્ન ભાતિ ચ ॥ ૮॥

આનન્દ એવાસ્તિ ભાતિ નાન્યઃ કશ્ચિદતોઽખિલમ્ ।
આનન્દઘનમન્યન્ન વિનાઽઽનન્દેન વિદ્યતે ॥ ૯॥

સર્વં હિ સચ્ચિદાનન્દં નેહ નાનાઽસ્તિ કિઞ્ચન ।
યઃ પશ્યતીહ નાનેવ મૃત્યોર્મૃત્યું સ ગચ્છતિ ॥ ૧૦॥

૩. અસત્યદર્શનમ્

મનોમયમિદં સર્વં ન મનઃ ક્વાપિ વિદ્યતે ।
અતો વ્યોમ્નીવ નીલાદિ દૃશ્યતે જગદાત્મનિ ॥ ૧॥

મનસોઽનન્યયા સર્વં કલ્પ્યતેઽવિદ્યયા જગત્ ।
વિદ્યયાઽસૌ લયં યાતિ તદાલેખ્યમિવાખિલમ્ ॥ ૨॥

વિજૃંભતે યત્તમસો ભીરોરિહ પિશાચવત્ ।
તદિદં જાગ્રતિ સ્વપ્નલોકવદ્ દૃશ્યતે બુધૈઃ ॥ ૩॥

સઙ્કલ્પકલ્પિતં દૃશ્યં સઙ્કલ્પો યત્ર વિદ્યતે ।
દૃશ્યં તત્ર ચ નાન્યત્ર કુત્રચિદ્રજ્જુસર્પવત્ ॥ ૪॥

સઙ્કલ્પમનસો કશ્ચિન્ન હિ ભેદોऽસ્તિ યન્મનઃ ।
તદવિદ્યાતમઃ પ્રખ્યમિન્દ્રજાલમિવાદ્ભુતમ્ ॥ ૫॥

મરીચિકાવત્ પ્રાજ્ઞસ્ય જગદાત્મનિ ભાસતે ।
બાલસ્ય સત્યમિતિ ચ પ્રતિબિંબમિવ ભ્રમાત્ ॥ ૬॥

આત્મા ન ક્ષીરવદ્યાતિ રૂપાન્તરમતોऽખિલમ્ ।
વિવર્તમિન્દ્રજાલેન વિદ્યતે નિર્મિતં યથા ॥ ૭॥

માયૈવ જગતામાદિકારણં નિર્મિતં તયા ।
સર્વં હિ માયિનો નાન્યદસત્યં સિદ્ધિજાલવત્ ॥ ૮॥

વિભાતિ વિશ્વં વૃદ્ધસ્ય વિયદ્વનમિવાત્મનિ ।
અસત્યં પુત્રિકારૂપં બાલસ્યેવ વિપર્યયઃ ॥ ૯॥

એકં સત્યં ન દ્વિતીયં હ્યસત્યં ભાતિ સત્યવત્ ।
શિલૈવ શિવલિંગં ન દ્વિતીયં શિલ્પિના કૃતમ્ ॥ ૧૦॥

૪. માયાદર્શનમ્

ન વિદ્યતે યા સા માયા વિદ્યાऽવિદ્યા પરાऽપરા ।
તમઃ પ્રધાનં પ્રકૃતિર્બહુધા સૈવ ભાસતે ॥ ૧॥

પ્રાગુત્પત્તેર્યથાऽભાવો મૃદેવ બ્રહ્મણઃ પૃથક્ ।
ન વિદ્યતે બ્રહ્મ હિ યા સા માયાऽમેયવૈભવા ॥ ૨॥

અનાત્મા ન સદાત્મા સદિતિ વિદ્યોતતે યયા ।
સા વિદ્યેયં યથા રજ્જુસર્પતત્ત્વાવધારણમ્ ॥ ૩॥

આત્મા ન સદનાત્મા સદિતિ વિદ્યોતતે યયા ।
સૈવાવિદ્યા યથા રજ્જુસર્પયોરયથાર્થદૃક્ ॥ ૪॥

ઇન્દ્રિયાણિ મનોબુદ્ધી પઞ્ચપ્રાણાદયો યયા ।
વિસૃજ્યન્તે સૈવ પરા સૂક્ષ્માંગાનિ ચિદાત્મનઃ ॥ ૫॥

અંગાન્યેતાન્યવષ્ટભ્ય સુખી દુઃખીવ મુહ્યતિ ।
ચિદાત્મા માયયા સ્વસ્ય તત્ત્વતોऽસ્તિ ન કિઞ્ચન ॥ ૬॥

ઇન્દ્રિયાણાં હિ વિષયઃ પ્રપઞ્ચોऽયં વિસૃજ્યતે ।

યયા સૈવાઽપરાઽધ્યાત્મસ્થૂલસઙ્કલ્પનામયી ॥ ૭॥

શુક્તિકાયાં યથાઽજ્ઞાનં રજતસ્ય યદાત્મનિ ।
કલ્પિતસ્ય નિદાનં તત્તમ ઇત્યવગમ્યતે ॥ ૮॥

ધીયતેઽસ્મિન્ પ્રકર્ષેણ બીજે વૃક્ષ ઇવાખિલમ્ ।
અતઃ પ્રાધાન્યતો વાઽસ્ય પ્રધાનમિતિ કથ્યતે ॥ ૯॥

કરોતીતિ પ્રકર્ષેણ પ્રકૃત્યૈવ ગુણાન્ પૃથક્ ।
નિગદ્યતેઽસૌ પ્રકૃતિરિતિ હ ત્રિગુણાત્મિકા ॥ ૧૦॥

૫. ભાનદર્શનમ્
અન્તર્બહિર્વદાસીનં સદા ભ્રમરચઞ્ચલમ્ ।
ભાનં દ્વિધૈવ સામાન્યં વિશેષ ઇતિ ભિદ્યતે ॥ ૧॥

સ્થૂલં સૂક્ષ્મં કારણં ચ તુર્યં ચેતિ ચતુર્વિધમ્ ।
ભાનાશ્રયં હિ તન્નામ ભાનસ્યાપ્યુપચર્યતે ॥ ૨॥

દૃશ્યતામિહ કાયોઽહં ઘટોઽયમિતિ દૃશ્યતે ।
સ્થૂલમાશ્રિત્ય યદ્ભાનં સ્થૂલં તદિતિ મન્યતે ॥ ૩॥

અત્ર કાયો ઘટ ઇતિ ભાનં યત્તદ્વિશિષ્યતે ।
તથાઽહમયમિતિ યત્ સામાન્યમિતિ ચ સ્મૃતમ્ ॥ ૪॥

ઇન્દ્રિયાણિ મનોબુદ્ધી વિષયાઃ પઞ્ચવાયવઃ ।
ભાસ્યન્તે યેન તત્સૂક્ષ્મમસ્ય સૂક્ષ્માશ્રયત્વતઃ ॥ ૫॥

અજ્ઞોઽહમિતિ યદ્ભાનં તત્કારણમુદાહૃતમ્ ।
અત્રાહમિતિ સામાન્યં વિશેષોઽજ્ઞ ઇતિ સ્ફુરત્ ॥ ૬॥

અહં બ્રહ્મેતિ યદ્ભાનં તત્તુર્યમિતિ શંસ્યતે ।
સામાન્યમહમિત્યંશો બ્રહ્મેત્યત્ર વિશિષ્યતે ॥ ૭॥

યત્ર ભાનં તત્ર ભાસ્યં ભાનં યત્ર ન તત્ર ન ।
ભાસ્યમિત્યન્વયેનાપિ વ્યતિરેકેણ બોધ્યતે ॥ ૮॥

યથા દૃગ્દૃશમાત્માનં સ્વયમાત્મા ન પશ્યતિ ।
અતો ન ભાસ્યતે હ્યાત્મા યં પશ્યતિ સ ભાસ્યતે ॥ ૯॥

યદ્ભાસ્યતે તદધ્યસ્તમનધ્યસ્તં ન ભાસ્યતે ।
યદધ્યસ્તં તદસદપ્યનધ્યસ્તં સદેવ તત્ ॥ ૧૦॥

૬. કર્મદર્શનમ્

આત્મૈવ માયયા કર્મ કરોતિ બહુરૂપધૃક્ ।
અસંગઃ સ્વપ્રકાશોઽપિ નિદ્રાયામિવ તૈજસઃ ॥ ૧॥

મન્યે વદામિ ગૃહ્ણામિ શ‍ૃણોમીત્યાદિ રૂપતઃ ।
ક્રિયતે કર્મ પરમાત્મના ચિત્તેન્દ્રિયાત્મના ॥ ૨॥

આત્મૈવ કર્મણઃ પૂર્વમન્યત્ કિઞ્ચિન્ન વિદ્યતે ।
તતઃ સ્વેનૈવ કર્માણિ ક્રિયન્તે નિજમાયયા ॥ ૩॥

શક્તિરસ્ત્યાત્મનઃ કાચિદ્દુર્ઘટા ન પૃથક્ સ્વતઃ ।
તયૈવારોપ્યતે કર્મ નિખિલં નિષ્ક્રિયાત્મનિ ॥ ૪॥

સર્વદાઽસંગ એવાત્માઽજ્ઞતયા કર્મ સંગિવત્ ।
કરોતિ ન કરોમીતિ ન જ્ઞઃ કર્મસુ સજ્જતે ॥ ૫॥

જ્વલતિ જ્વલનો વાયુર્વાતિ વર્ષતિ વારિદઃ ।
ધરાત્મા સન્ ધરતિ ખલ્વેકો વહતિ વાહિની ॥ ૬॥

ઊર્દ્ધ્વં પ્રાણો હ્યધોઽપાનઃ ખલ્વેકો યાતિ નિષ્ક્રિયઃ ।
નાડ્યન્તરાલે ધમતિ ક્રન્દતિ સ્પન્દતિ સ્થિતઃ ॥ ૭॥

અસ્તિ જન્મર્દ્ધિપરિણત્યપક્ષયવિનાશનમ્ ।
ષડ્ભાવમિહ યો યાતિ સ નાન્યોઽવિક્રિયાત્મનઃ ॥ ૮॥

સ્વયં ક્રિયન્તે કર્માણિ કરણૈરિન્દ્રિયૈરપિ ।
અહં ત્વસંગઃ કૂટસ્થ ઇતિ જાનાતિ કોવિદઃ ॥ ૯॥

દૃશ્યત્વાદ્ ભાસ્યમહમપ્યતોઽહં શુક્તિરંગવત્ ।
અધ્યસ્તમેક એવાદ્ય શ્ચોઽપિ સર્વોપરિ સ્થિતઃ ॥ ૧૦॥

૭. જ્ઞાનદર્શનમ્

જ્ઞાનમેકં હિ નિરુપાધિકં સોપાધિકં ચ તત્ ।
અહઙ્કારાદિહીનં યજ્જ્ઞાનં તન્નિરુપાધિકમ્ ॥ ૧॥

અહન્તયાન્તર્બહિરસ્તિ યદેવમિદન્તયા ।
ભાનવૃત્ત્યાઽન્વિતં યત્તુ જ્ઞાનં સોપાધિકં મતમ્ ॥ ૨॥

અનાત્મનામહઙ્કારાદીનાં યેનાનુભૂયતે ।

સાક્ષી તદાત્મજ્ઞાનં સ્યાદ્યેનૈવામૃતમશ્નુતે ॥ ૩॥

અહઙ્કારાદિ કાર્યં યદનાત્મકમસંખ્યકમ્ ।
યેનાવગમ્યતેઽનાત્મજ્ઞાનં તદવધાર્યતે ॥ ૪॥

યથાવદ્વસ્તુવિજ્ઞાનં રજ્જુતત્ત્વાવબોધવત્ ।
યત્તદ્યથાર્થવિજ્ઞાનમયથાર્થમતોઽન્યથા ॥ ૫॥

યત્સાન્નિધ્યાદેવ સર્વં ભાસતે સ્વયમેવ તત્ ।
પ્રત્યક્ષજ્ઞાનમિતિ ચાપરોક્ષમિતિ લક્ષ્યતે ॥ ૬॥

યયાનુઽસાધકં સાધ્યં મીયતે જ્ઞાનરૂપયા ।
વૃત્ત્યા સાઽનુમિતિઃ સાહચર્યસંસ્કારજન્યયા ॥ ૭॥

ગત્વા સમીપં મેયસ્ય મીયતે શ્રુતલક્ષણઃ ।
યયા સંવિત્ સોપમિતિર્મૃગોઽયમિતિ રૂપયા ॥ ૮॥

અહં મમેતિ જ્ઞાનં યદિદં તદિતિ યચ્ચ તત્ ।
જીવજ્ઞાનં તદપરમિન્દ્રિયજ્ઞાનમિષ્યતે ॥ ૯॥

ઓં તત્ સદિતિ નિર્દિષ્ટં બ્રહ્માત્મૈક્યમુપાગતમ્ ।
કલ્પનાદિવિહીનં યત્તત્ પરજ્ઞાનમીર્યતે ॥ ૧૦॥

૮. ભક્તિદર્શનમ્

ભક્તિરાત્માનુસન્ધાનમાત્માઽઽનન્દઘનો યતઃ ।
આત્માનમનુસન્ધત્તે સદૈવાત્મવિદાત્મના ॥ ૧॥

અનુસન્ધીયતે બ્રહ્મ બ્રહ્માનન્દઘનં યતઃ ।
સદા બ્રહ્માનુસન્ધાનં ભક્તિરિત્યવગમ્યતે ॥ ૨॥

આનન્દમેવ ધ્યાયન્તિ સર્વે દુઃખં ન કશ્ચન ।
યદાનન્દપરં ધ્યાનં ભક્તિરિત્યુપદિશ્યતે ॥ ૩॥

આત્મૈવ બ્રહ્મ ભજતિ નાન્યમાત્માનમાત્મવિત્ ।
ભજતીતિ યદાત્માનં ભક્તિરિત્યભિધીયતે ॥ ૪॥

આનન્દ આત્મા બ્રહ્મેતિ નામૈતસ્યૈવ તન્યતે ।
ઇતિ નિશ્ચિતધીર્યસ્ય સ ભક્ત ઇતિ વિશ્રુતઃ ॥ ૫॥

આનન્દોઽહમહં બ્રહ્માત્માઽહમસ્મીતિ રૂપતઃ ।
ભાવના સતતં યસ્ય સ ભક્ત ઇતિ વિશ્રુતઃ ॥ ૬॥

ભાર્યા ભજતિ ભર્ત્તારં ભર્ત્તા ભાર્યાં ન કેવલમ્ ।
સ્વાનન્દમેવ ભજતિ સર્વોઽપિ વિષયસ્થિતમ્ ॥ ૭॥

એવં પશ્યતિ કુત્રાપિ વિદ્વાનાત્મસુખં વિના ।
ન કિઞ્ચિદપરં તસ્ય ભક્તિરેવ ગરીયસી ॥ ૮॥

લોકસ્ય પિતરિ સ્વસ્ય ગુરૌ પિતરિ માતરિ ।
સત્યસ્ય સ્થાપિતરિ ચ તત્પથેનૈવ યાતરિ ॥ ૯॥

નિયન્તરિ નિષિદ્ધસ્ય સર્વેષાં હિતકર્તરિ ।
યોઽનુરાગો ભક્તિરત્ર સા પરા પરમાત્મનિ ॥ ૧૦॥

૯. યોગદર્શનમ્

સતતં યોજયતિ યદ્યુનક્તિ ચ ચિદાત્મનિ ।
મનોનિરોધરૂપોઽયં સ યોગ ઇતિ શંસિતઃ ॥ ૧॥

ન દ્રષ્ટા દર્શનં દૃશ્યં વિદ્યતે યત્ર તત્ર હૃત્ ।
યોજયેદ્વાસના યાવદ્યોગોઽયમિતિ યોગવિત્ ॥ ૨॥

નામરૂપમિદં સર્વં બ્રહ્મૈવેતિ વિલીયતે ।
યદ્બ્રહ્મણિ મનો નિત્યં સ યોગ ઇતિ નિશ્ચિતઃ ॥ ૩॥

ચિત્તસ્ય તૈલધારાવદ્વૃત્ત્યાઽઽવિચ્છિન્નયાઽઽત્મનિ ।
નિરન્તરં રમ્યતે યત્ સ યોગો યોગિભિઃ સ્મૃતઃ ॥ ૪॥

યતો યતો મનો યાતિ સદાઽઽત્મનિ તતસ્તતઃ ।
નિયમ્ય યોજયેદેતદ્યોગોઽયં યુજ્યતામિહ ॥ ૫॥

સર્વાનર્થકરઃ પુંસાં સઙ્કલ્પઃ કલ્પિતૈઃ સહ ।
ઉન્મૂલ્ય વાસનાજાલૈર્યેનાત્મનિ નિરુધ્યતે ॥ ૬॥

દૃશ્યસ્ય ન દૃશોઽસ્તિત્વમતો દૃશ્યં દૃગાત્મકમ્ ।
ઇતિ યુઞ્જીત દૃગ્રૂપે યઃ સ યોગવિદાં વરઃ ॥ ૭॥

યદા પિબન્ મનોભૃંગઃ સ્વાનન્દમધુમાધુરીમ્ ।
ન સ્પન્દતિ વશીકૃત્ય યોજિતો યોગવાયુના ॥ ૮॥

ધ્યાનમન્તર્ભ્રુવોર્દૃષ્ટિર્જિહ્વાગ્રં લંબિકોર્ધ્વતઃ ।
યદા સ્યાત્ ખેચરીમુદ્રા નિદ્રાલસ્યાદિનાશિની ॥ ૯॥

જ્ઞાનં કર્મેતિ લોકેઽસ્મિન્ દ્વિધા યોગઃ સમાસતઃ ।
અનયોર્યોગવિસ્તારઃ સર્વઃ પરિસમાપ્યતે ॥ ૧૦॥

૧૦. નિર્વાણદર્શનમ્
નિર્વાણં દ્વિવિધં શુદ્ધમશુદ્ધં ચેતિ તત્ર યત્ ।
શુદ્ધં નિર્વાસનં તદ્વદશુદ્ધં વાસનાન્વિતમ્ ॥ ૧॥

અતિશુદ્ધં શુદ્ધમિતિ શુદ્ધં ચ દ્વિવિધં તથા ।
અશુદ્ધશુદ્ધં ચાશુદ્ધમશુદ્ધાશુદ્ધમુચ્યતે ॥ ૨॥

અતિશુદ્ધં ત્રિધા પશ્ચાદ્વરે ચૈકં વરીયસિ ।
એકમેકં વરિષ્ઠેઽથ શુદ્ધં બહ્મવિદિ સ્થિતમ્ ॥ ૩॥

અશુદ્ધશુદ્ધં વિરજસ્તમોઽન્યત્ સરજસ્તમઃ ।
મુમુક્ષૌ પ્રથમં વિદ્યાત્ દ્વિતીયં સિદ્ધિકામિષુ ॥ ૪॥

દગ્ધ્વા જ્ઞાનાગ્નિના સર્વમુદ્દિશ્ય જગતાં હિતમ્ ।
કરોતિ વિધિવત્ કર્મ બ્રહ્મવિદ્બ્રહ્મણિ સ્થિતઃ ॥ ૫॥

સન્યસ્ય સર્વકર્માણિ સતતં બ્રહ્મનિષ્ઠયા ।
યશ્ચરત્યવનૌ દેહયાત્રાયૈ બ્રહ્મવિદ્વરઃ ॥ ૬॥

અન્યેન વેદિતો વેત્તિ ન વેત્તિ સ્વયમેવ યઃ ।
સ વરીયાન્ સદા બ્રહ્મનિર્વાણમયમશ્નુતે ॥ ૭॥

સ્વયં ન વેત્તિ કિઞ્ચિન્ન વેદિતોઽપિ તથૈવ યઃ ।
સ વરિષ્ઠઃ સદા વૃત્તિશૂન્યોઽયં બ્રહ્મ કેવલમ્ ॥ ૮॥

હેયોપાદેયતા ન હ્યસ્યાત્મા યા સ્વપ્રકાશકઃ ।
ઇતિ મત્વા નિવર્ત્તેત વૃત્તિર્નાવર્તતે પુનઃ ॥ ૯॥

એકમેવાદ્વિતીયં બ્રહ્માસ્તિ નાન્યન્ન સંશયઃ ।
ઇતિ વિદ્વાન્ નિવર્તેત દ્વૈતાન્નાવર્તતે પુનઃ ॥ ૧૦॥

ઓં તત્ સત્

---

૧૪. બ્રહ્મવિદ્યા પઞ્ચકમ્

નિત્યાનિત્યવિવેકતો હિ નિતરાં નિર્વેદમાપદ્ય સદ્-
વિદ્વાનત્ર શમાદિષટ્કલસિતઃ સ્યાન્મુક્તિકામો ભુવિ ।

પશ્ચાદ્બ્રહ્મવિદુત્તમં પ્રણતિસેવાદ્યૈઃ પ્રસન્નં ગુરું
પૃચ્છેત્ કોઽહમિદં કુતો જગદિતિ સ્વામિન્! વદ ત્વં પ્રભો! ॥ ૧॥

ત્વં હિ બ્રહ્મ ન ચેન્દ્રિયાણિ ન મનો બુદ્ધિર્ન ચિત્તં વપુઃ
પ્રાણાહઙ્કૃતયોઽન્યદપ્યસદવિદ્યાકલ્પિતં સ્વાત્મનિ ।
સર્વં દૃશ્યતયા જડં જગદિદં ત્વત્તઃ પરં નાન્યતો
જાતં ન સ્વત એવ ભાતિ મૃગતૃષ્ણાભં દરીદૃશ્યતામ્ ॥ ૨॥

વ્યપ્તં યેન ચરાચરં ઘટશરાવાદીવ મૃત્સત્તયા
યસ્યાન્તઃસ્ફુરિતં યદાત્મકમિદં જાતં યતો વર્તતે ।
યસ્મિન્ યત્ પ્રલયેઽપિ સદ્ઘનમજં સર્વં યદન્વેતિ તત્
સત્યં વિધ્યમૃતાય નિર્મલધિયો યસ્મૈ નમસ્કુર્વતે ॥ ૩॥

સૃષ્ટ્વેદં પ્રકૃતેરનુપ્રવિશતી યેયં યયા ધાર્યતે
પ્રાણીતિ પ્રવિવિક્તભુગ્બહિરહં પ્રાજ્ઞસ્સુષુપ્તૌ યતઃ ।
યસ્યામાત્મકલા સ્ફુરત્યહમિતિ પ્રત્યન્તરઙ્ગં જનૈ-
ર્યસ્યૈ સ્વસ્તિ સમર્થ્યતે પ્રતિપદા પૂર્ણા શ◌ૃણુ ત્વં હિ સા ॥ ૪॥

પ્રજ્ઞાનં ત્વહમસ્મિ તત્ત્વમસિ તદ્ બ્રહ્માયમાત્મેતિ સં-
ગાયન્ વિપ્રચર પ્રશાન્તમનસા ત્વં બ્રહ્મબોધોદયાત્ ।
પ્રારબ્ધં ક્વનુ સઞ્ચિતં તવ કિમાગામિ ક્વ કર્માપ્યસત્
ત્વય્યધ્યસ્તમતોઽખિલં ત્વમસિ સચ્ચિન્માત્રમેકં વિભુઃ ॥ ૫॥

---

## ૧૫. નિર્વૃતિપઞ્ચકમ્

કો નામ દેશઃ કા જાતિઃ પ્રવૃત્તિઃ કા કિયદ્વયઃ ।
ઇત્યાદિ વાદોપરતિર્યસ્ય તસ્યૈવ નિર્વૃતિઃ ॥ ૧॥

આગચ્છ ગચ્છ મા ગચ્છ પ્રવિશ ક્વ નુ ગચ્છસિ ।
ઇત્યાદિ વાદોપરતિર્યસ્ય તસ્યૈવ નિર્વૃતિઃ ॥ ૨॥

ક્વ યાસ્યાસિ કદાઽઽયાતઃ કુત આયાસિ કોઽસિ વૈ ।
ઇત્યાદિ વાદોપરતિર્યસ્ય તસ્યૈવ નિર્વૃતિઃ ॥ ૩॥

અહં ત્વં સોયઽમન્તર્હિ બહિરસ્તિ ન વાસ્તિ વા ।
ઇત્યાદિ વાદોપરતિર્યસ્ય તસ્યૈવ નિર્વૃતિઃ ॥ ૪॥

જ્ઞાતાજ્ઞાતસમઃ સ્વાન્યભેદશૂન્યઃ કુતો ભિદા ।

ઇત્યાદિ વાદોપરતિર્યસ્ય તસ્યૈવ નિર્વૃતિઃ ॥ ૫॥

૧૬. શ્લોકત્રયી

અસ્તિ ધર્મીત્યનુમિતિઃ કથં ભવતિ વાગપિ ।
અસન્નિકૃષ્ટત્વાદસ્મિન્ પ્રત્યક્ષમનુમાનવત્ ॥ ૧॥

ન વિદ્યતેઽસ્તિ ધર્મીતિ પ્રત્યક્ષમનુમાનવત્ ।
માનાભાવાદસૌ નેતિ બોધ એવાવશિષ્યતે ॥ ૨॥

અસન્નિકૃષ્ટત્વાદસ્ય પ્રત્યક્ષં ધર્મધર્મિણોઃ ।
અસૃષ્ટસાહચર્યાચ્ચ ધર્મિણ્યનુમિતિઃ કુતઃ? ॥ ૩॥

૧૭. હોમમન્ત્રમ્

ૐ

અગ્ને તવ યત્તેજસ્તદ્બ્રાહ્મં
અતસ્ત્વં પ્રત્યક્ષં બ્રહ્માસિ
ત્વદીયા ઇન્દ્રિયાણિ મનો બુદ્ધિરિતિ સપ્તજિહ્વાઃ
ત્વયિ વિષયા ઇતિ સમિધો જુહોમિ
અહમિત્યાજ્યં જુહોમિ
ત્વં નઃ પ્રસીદ પ્રસીદ
શ્રેયશ્ચ પ્રેયશ્ચ પ્રયચ્છ સ્વાહા
ઓં શાન્તિઃ શાન્તિઃ શાન્તિઃ

૧૮. વેદાન્તસૂત્રમ્

અથ યદાત્મનો જિજ્ઞાસુસ્તદિદં બ્રહ્મૈવાહમ્ ॥ ૧॥

કિં તસ્ય લક્ષણમસ્ય ચ કતિ ગણનયેતિ ॥ ૨॥

તજ્જ્યોતિઃ ॥ ૩॥

તેનેદં પ્રજ્વલિતમ્ ॥ ૪॥

તદિદં સદસદિતિ ॥ ૫॥

ભૂયો સતઃ સદસદિતિ ॥ ૬॥

સચ્છબ્દાદયોઽસદભાવશ્ચેતિ ॥ ૭॥

પૂર્વં સદિદમનુસૃત્ય ચક્ષુરાદયશ્ચૈકં ચેતિ ॥ ૮॥

જ્ઞાતૃજ્ઞાનયોરન્યોન્યવિષયવિષયિત્વાન્મિથુનત્વમિતિ ॥ ૯॥

એવં જ્ઞાનજ્ઞેયવિભાગે ॥ ૧૦॥

એકૈકં રુદ્રત્વમાસીદિતિ ॥ ૧૧॥

બ્રહ્મૈવાહં તદિદં બ્રહ્મૈવાહમસ્મિ ॥ ૧૨॥

અતીતાગામિનોરસત્ત્વં યતઃ યદેતદન્વિચ્છત ॥ ૧૩॥

પરિણામં તતઃ ॥ ૧૪॥

સદસતોરન્યોન્યકાર્યકારણત્વાત્ ॥ ૧૫॥

અહં મમેતિ વિજ્ઞાતઃ ॥ ૧૬॥

મત્તો નાન્યસ્તદ્વત્ તસ્માત્ ॥ ૧૭॥

દૃગ્દૃશ્યયોઃ સમાનકાલીનત્વાત્ ॥ ૧૮॥

સુખૈકત્વાત્ ॥ ૧૯॥

વ્યાપકતયા દિશામસ્તિત્વાત્ ॥ ૨૦॥

અણુમહદવયવતારતમ્યસ્યાભાવાત્ ॥ ૨૧॥

અસતોઽવ્યાપકત્વાત્ ॥ ૨૨॥

આત્માન્યત્ કિઞ્ચિન્નાસ્તિ ॥ ૨૩॥

તસ્માત્ તસ્ય સત્ત્વાચ્ચ ॥ ૨૪॥

---

## ૧૯. ચટ્ટમ્પિ સ્વામિનઃ મહાસમાધિમનુબધ્ય
## કૃતૌ સમાધિ શ્લોકૌ

સર્વજ્ઞઃ ઋષિરુત્ક્રાન્તઃ સદ્ગુરુઃ શુકવર્ત્મના ।
આભાતિ પરમવ્યોમ્નિ પરિપૂર્ણકલાનિધિઃ ॥ ૧॥

લીલયા કાલમધિકં નીત્વાઽન્તે સ મહાપ્રભુઃ ।

નિસ્સ્વં વપુઃ સમુત્સૃજ્ય સ્વં બ્રહ્મ વપુરાસ્થિતઃ ॥ ૨॥

Encoded by Shankara and P. S. Ramachandran

Proofread by PSA Easwaran

*shrInArAyaNaguruvirachitAH saMskRitakriyAH*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*